# 6 रमणीया नगरी



गान्धीनगरं गूर्जरराज्यस्य राजधानी अस्ति। इदं सुन्दरं, सुयोजितं च नगरम् अस्ति। अत्र बहूनि दर्शनीयानि स्थानानि सन्ति। यथा सचिवालयः, महात्मामन्दिरम्, अक्षरधाममन्दिरम् एवं इन्द्रोडा पक्षि उद्यानम्।



इदं सचिवालयभवनम् अस्ति। अस्मिन् भवने विधानसभायाः अधिवेशनानि भवन्ति। अस्मिन्नेव भवने स्थित्वा राज्यस्य मन्त्रिणः, सचिवाः अन्ये च अधिकारिणः राज्यकार्यं सञ्चालयन्ति। सचिवालयः एव गूर्जरप्रदेश-शासनस्य मुख्यः कार्यालयः अस्ति।



अस्माकं राष्ट्रपितुः श्रीगान्धिमहोदयस्य स्मृतिरूपेण एतस्य मन्दिरस्य निर्माणम् अभवत्। यत् 'महात्मामन्दिर नाम्ना प्रसिद्धमस्ति' महात्मा गान्धिमहोदयः भारतस्य स्वतन्त्रतायाः कृते भृशं प्रयत्नम् अकरोत्। एतानि सर्वाणि कार्याणि चित्ररूपैः अत्र प्रदर्शनार्थं प्रस्तुतानि सन्ति।



Get More Learning Materials Here : CLICK HERE www.studentbro.in



एतत् 'अक्षरधाम' नामकं विशालं मन्दिरम् अस्ति। मन्दिरे प्रदर्शनविभागः अतीव मनोहरः अस्ति। प्रदर्शनविभागे जनाः एकं चलचित्रम् अपि पश्यन्ति। अध्यात्मविज्ञानयोः सङ्गमः अत्र दृश्यते। अत्र चित्ताकर्षकं विशालम् उद्यानम् अपि अस्ति। प्रतिदिनं बहवः यात्रिकाः एतस्य मन्दिरस्य दर्शनार्थम् आगच्छन्ति।



गान्धीनगरस्य समीपे एव विशालं इन्द्रोडा पक्षिउद्यानम् अस्ति। एतस्मिन् स्थाने खगाः, प्राणिनः च निजपर्यावरणे एव निवसन्ति। डायनोसोर नाम्नः प्राचीनमहाकायप्राणिनः विशेषः विभागः अस्ति। एषः विभागः बालानां कृते अतीव आकर्षकः मनोरञ्जकः च अस्ति। अत्र एकं सर्पगृहम् अपि अस्ति। विविधकुलानां सर्पान् अत्र द्रष्टुं शक्नुमः।



महात्मागान्धिमन्दिरतः नातिदूरे एव विद्याभवन् नाम विशालं भवनम् अस्ति। तत् एव भवनं जी.सी.ई.आर.टी. रूपेण ख्यातम् अस्ति। विद्याभवने जी.सी.ई.आर.टी. नाम परिषदः कार्यालयः अस्ति। इयं परिषद् अस्माकं प्राथमिक शिक्षणक्षेत्रे परिवर्तनार्थं सततं प्रवृत्ता अस्ति

गान्धीनगरे विशालाः स्वच्छमार्गाः वर्तन्ते। एतस्मिन् नगरे बहूनि रमणीयानि उद्यानानि सन्ति। नगरे बहवः पादपाः सन्ति तेन कारणेन इदं नगरं विश्वस्य हरितनगरं रूपेण अपि प्रसिद्धम्।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

## Glossary

**इदम्** this **बहूनि** many **अस्मिन्** in this **भृशम्** a lot of **दर्शयति** shows/is showing **निवसन्ति** lives **कुलानाम्** of families dynasties **द्रष्टुम्** to see **नातिदूरे** not far **ख्यातम्** famous

## Exercise

**1. Pronounce the following words correctly :**

गूर्जरराज्यस्य, दर्शनीयानि, इन्द्रोडा, पक्षि-उद्यानम्, अस्मिन्, स्थित्वा, सञ्चालयन्ति, स्मृतिः, स्वतन्त्रतायाः, भृशम्, प्रदर्शनार्थम्, चित्ताकर्षकम्।

**2. Answer the following questions :**

(1) गूर्जरराज्यस्य राजधानी किम् नगरम् अस्ति ?

(2) महात्मागान्धिमन्दिरतः नाति दूरे एव किम् अस्ति ?

(3) पक्षि-उद्याने किं किम् अस्ति ?

(4) अध्यात्मविज्ञानयोः सङ्गमः कुत्र दृश्यते ?

(5) स्वतन्त्रतायाः कृते कः भृशं प्रयत्नम् अकरोत् ?

**3. Match the following 'A' and 'B' properly :**

| A | | B |
|---|---|---|
| (1) गान्धिनगरम् | ☐ | (1) जी.सी.ई.आर.टी. |
| (2) अक्षरधाममन्दिरम् | ☐ | (2) अस्माकं राष्ट्रपिता |
| (3) इन्द्रोडा पक्षि-उद्यानम् | ☐ | (3) अस्माकं राष्ट्रपितुः स्मृतिः |
| (4) विद्याभवनम् | ☐ | (4) विविधकुलानां सर्पाः |
| (5) महात्मामन्दिरम् | ☐ | (5) हरितनगरम् |
| | | (6) चलचित्रं पश्यन्ति |



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**4. Frame the sentences using the words from the brackets. Follow the example :**

(मन्दिरम्, पक्षिगृहम्, उद्यानम्, तडागः)

**Illustration :** मम ग्रामे विद्यालयः अस्ति।

(1) ______________________

(2) ______________________

(3) ______________________

(4) ______________________

**5. Translate the following sentences into Sanskrit :**

(1) My village is beautiful.

(2) There are many birds here.

(3) There is a garden in my village.

(4) My school is big.

(5) Gandhiji is the father of our nation.

**6. Fill in the blanks selecting the appropriate option from the brackets :**

(1) अत्र पाठशाला अस्ति। पाठशालायां __________ सन्ति। (छात्राः, खगाः)

(2) अत्र शिक्षकखण्डः अस्ति। शिक्षकखण्डे __________ सन्ति। (बालाः, शिक्षकाः)

(3) अत्र पुस्तकालयः अस्ति। पुस्तकालये __________ सन्ति। (पुस्तकानि, बालिकाः)

**7. Describe your village/town in Sanskrit in 5 to 6 sentences :**

**Activities**

- Draw a map/outline of your village.
- Collect more information about the capital of Gujarat from the library.
- Get details about places of tourist interest or worth visiting around your area.



Get More Learning Materials Here : CLICK HERE www.studentbro.in